# Svayambhu Stava

# स्वयम्भूस्तवः

## Document Information

Text title : Svayambhu Stava

File name : svayambhUstavaH.itx

Category : vishhnu, dashAvatAra, buddha, stava

Location : doc_vishhnu

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# स्वयम्भूस्तवः

नमस्ते विश्वरूपाय ज्योतीरूपाय ते नमः ।
नमः स्वयम्भवे नित्यं जगदुद्धारहेतवे ॥ १॥

त्वं बुद्धस्त्वं च धर्मो दशबलतनयस्त्वं तथा बोधिसत्त्व-
स्त्वं भिक्षुः श्रावकस्त्वं कुलिशवरधरस्त्वं तथा धर्मधातुः ।
त्वं ब्रह्मा त्वं च विष्णुः प्रमथगणपतिस्त्वं महेन्द्रो यमस्त्वं
त्वं पाशी त्वं धनेशस्त्वमनलपवनौ नैरृतस्त्वं महेशः ॥ २॥

भूताः प्रेताश्चतिर्यक् त्वममरमदितिमार्नवास्त्वं वयं च
चातुर्योनिस्त्वमेव त्रिगुणवरतनुः पञ्चज्ञानैकमूर्तिः ।
वर्णास्त्वं कालमासा दिनमपि रजनी पञ्चभूतास्त्वमेव
अन्नं रत्नं च सर्वं मतिरति महती नः सदा त्वां नताः स्मः ॥ ३॥

पञ्चज्ञानेन बुद्धान् सृजसि स्वयमथो बोधिसत्त्वांश्च पञ्च-
भूतानेतान् गुणांस्त्रीनजहरिगिरिशान् स्थावराञ्जङ्गमांश्च ।
सर्वेषां चेतसि स्थो नटयसि सकलं सर्वतो रक्षकोऽसि
त्वं बीजं चाङ्कुरस्त्वं फलमपि विटपी सर्वदा त्वां नताः स्मः ॥ ४॥

श्रेष्ठं क्षत्रं त्वमस्मिन् प्रभवसि भगवान् सर्वतः सर्वदेवान्
ग्रामांस्तीर्थानि देशान् नृपसहितनरान् नैगमांश्चापि सर्वान् ।
द्वीपेष्वन्येष्वपि त्वं विभजसि सकलं ज्योतिषां संविभागं
बीजीभूतैकदीपोऽस्यखिलमपि जगद्व्यापकस्त्वां नताः स्मः ॥ ५॥

ज्योतिस्त्वदीयं परितो विसारि सितारुणश्यामकपीतरक्तं
दृष्टं ततः सर्वमिदं भवन्तं मन्यामहे त्वां प्रणताः स्म नित्यम् ॥ ६॥

नुतिं महाराजकृतां ये पठिष्यन्ति मानवाः ।
चक्रवर्तिपदं प्राप्य ते हि मुक्तिमवाप्नुयुः ॥ ७॥

इति श्रीचातुर्महाराजकृतं स्वयम्भूस्तवं सम्पूर्णम् ॥

*Svayambhu Stava*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*